KENDRIYA VIDYALAYA IIT CAMPUS CHENNAI

SA II – MODEL PAPER 2017

SANSKRIT

कक्षा–अष्टमी　　　　　　　　　　　　　　　　　　　　　समयः –सार्धहोराद्वयम्

पूर्णाङ्काः 60

**खण्डः " क " अपठित–अवबोधनम् (06)**

**1. निम्नलिखितकथांशं पठित्वा तदाधारितप्रश्नान् उत्तरत–**

एकदा राजकुमारः सिद्धार्थः विहारार्थम् उपवनं गतः । सहसा विलापध्वनिं श्रुत्वा सः इतस्ततः अपश्यत् । बाणेन मारितः एकः हंसः भूमौ पतितः आसीत् । एतत् दृष्ट्वा सिद्धार्थः करुणया व्याकुलः अभवत् । सः धावित्वा हंसस्य शरीरात् बाणं निष्कास्य तम् अङ्के अधारयत् । अत्रान्तरे देवदत्तः धावित्वा तत्र आगतः । सिद्धार्थस्य हस्ते हंसं दृष्ट्वा सः उच्चैः अवदत्–"सिद्धार्थ ! एषः मम हंसः । मया बाणेन मारितः । अतः मह्यं देहि ।" सिद्धर्थः अवदत्–"अहं न दास्यामि, अहम् अस्य रक्षकः अस्मि ।" तदा तौ विवादं कुर्वन्तौ राजसभां गतौ । राजा सर्वं वृत्तान्तम् श्रुत्वा आदिशत्–'यस्य पार्श्वे हंसः आगमिष्यति तस्यैव भविष्यति ।' हंसः सिद्धार्थस्य समीपं गतवान् । सत्यमिदम्–भक्षकात् रक्षकः श्रेयान् ।

**(अ) एकपदेन उत्तरत–　　　　　　　　　　　　　　　　　　　　2 x1/2=2**

1) एकदा कः विहारार्थम् उपवनं गतः ? -------------------------

2) बाणेन मारितः हंसः कुत्र पतितः आसीत् ? -------------------------

**(आ) पूर्णवाक्येन उत्तरत–　　　　　　　　　　　　　　　　　　　1 x2=2**

1) सिद्धार्थः किं कृत्वा हंसम् अङ्के अधारयत् ?

-----------------------------------------------

2) सिद्धार्थस्य हस्ते हंसं दृष्ट्वा देवदत्तः किम् अवदत् ?-------------------

1. एकं क्त्वा प्रत्ययपदं लिखत -------------(१)

२. एकं अव्यय पदं लिखत ----------------(१)

## खण्डः " ख " रचनात्मकं कार्यम् (12)

**2. चित्रं दृष्ट्वा मञ्जूषागत–शब्दानां सहायतया चत्वारि वाक्यानि लिखत– 4 x2=8**



**मञ्जूषा–**

| | | | |
|---|---|---|---|
| स्वतन्त्रतादिवसः, | समारोहः, | मुख्यातिथिमहोदयः, | ध्वजारोहणम्, |
| भाषणम्, | विद्यालये, | प्राचार्यः, | छात्राः, संकल्पः, |
| सांस्कृतिक–कार्यक्रमः, | मिष्टान्नम्, | वितरति। | |

1.–––––––––––––––––––––––––––––––––––––––––––

2–––––––––––––––––––––––––––––––––––––––––––

3–––––––––––––––––––––––––––––––––––––––––––

4––––––––––––––––––––––––––––––––––––––––––––––

**3. वाक्यानि रचयत– 4 x1=4**

1) स्वकीयम्  –  -----------------------------------

2) हिमालये  –  ---------------------------------------

3) साम्प्रतम्  –  --------------------------------------

4) परितः  –  ---------------------------------------

**खण्डः–“ ग ” अनुप्रयुक्त–व्याकरणम् (18)**

**4. निम्नलिखितेषु सन्धिं  विच्छेदं वा यथापेक्षं कुरुत –  १ x३=3**

1) अद्य + अपि  =  ---------------

2) सहसैव  =  सहसा+----------

3) प्रथ्मोपग्रहस्य  =  ---------+उपग्रहस्य

**५. उदाहरणानुसारं धातुभिः सह क्त्वा प्रत्ययं योजयित्वा पदनिर्माणं कुरुत–  3 x 1=3**

यथा – गम्  +  क्त्वा  =  गत्वा

1)  नम्  +  क्त्वा  =  ----------

2)  त्यज्  +  क्त्वा  =  ----------

3)  भुज्  +  क्त्वा  =  ----------

६.शब्दरूपणि सोदाहरणं लिखत  (३)

मतिः  मती मतयः  ।

१ बुद्धिः ---------  -----------।

२ रीतिः -------------   --------------।

३ प्रीतिः ----------- ------------------।

७. संख्यावाचकपदं लिखत   (३)

१. अस्मिन् विद्यालये -----------(75) छात्राः पठन्ति ।

२. दशरथस्य ----------( 4) पुत्राः सन्ति ।

३. रावणस्य  -------- (10) मुखानि सन्ति ।

8.  क्रियापदैः रिक्तस्थानानि पूरयत (३)

१.  अयं प्रयोगः प्रतीकात्मकः -----------

२. सप्त केन्द्र शासित प्रदेशाः ----------

३. अहं किमपि श्रोतुं  ----------------

९. लट् लकारात् लङ् लकारे परिवर्तनं कुरुत  (३)

१. वयं प्रतिदिनं पाठं पठामः  --------------------------

२. महिलाः तडागात् जलं नयन्ति । -------------------

३. ते बालकाः विद्यालयात् गृहं गच्छन्ति ।  --------------

**खण्डः " घ " पठित–अवबोधनम्    (24)**

**10. निम्नलिखित–गद्यांशं पठित्वा तदाधारित–प्रश्नान् उत्तरत–**

पूर्वस्यां दिशायम् उदेति सूर्यः पश्चिमदिशायां च अस्तं गच्छति इति दृश्यते हि लोके। परं न अनेन अवबोध्यमस्ति यत्सूर्यो गतिशील इति। सूर्योऽचलः पृथ्वी च चला या स्वकीये अक्षे घूर्णति इति साम्प्रतं सुस्थापितः सिद्धान्तः। सिद्धान्तोऽयं प्राथम्येन येन प्रवर्तितः सः आसीत् महान् गणितज्ञः ज्योतिर्विच्च आर्यभटः। पृथिवी स्थिरा वर्तते इति परम्परया प्रचलिता रूढिः तेन प्रत्यादिष्टा।

(अ) एकपदेन उत्तरत– २ x1/2=2

1) सूर्यः कस्यां दिशायाम् उदेति ? ----------------

2) महान् गणितज्ञः ज्योतिर्विच्च कः आसीत् ? ----------------

(आ) एकवाक्येन उत्तरत– १ x 1=१

1) आर्यभटेन सुस्थापितः सिद्धान्तः कः ?

---

१. इति पदं किं अस्ति ? ------------------

२. सः इति पदं किं अस्ति ?--------------------

11. निम्नलिखितश्लोकम् आश्रित्य प्रश्नान् उत्तरत– (4)

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः ।

पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः ॥

(अ) एकपदेन उत्तरत –

2 x 1=2

1) पृथिव्याः मानदण्डः कः ? ----------------------------------

2) हिमालयः भारतस्य कस्यां दिशि वर्तते ? --------------------------

(आ) एकवाक्येन उत्तरत– १ x 1=१

1) कुमारसम्भवमहाकाव्यस्य रचयिता कः ? ----------------------------

१. नगाधिराजः नग + ------------- (१)

२. एकं क्रियापदं चित्वा लिखत ----------(१)

12. अधोलिखितं संवादं पठित्वा प्रश्नान् उत्तरत– (4)

**चेनम्मा** – प्लास्टिकस्य मृत्तिकायां लयाभावात् अस्माकं पर्यावरणस्य कृते महती क्षतिः भवति ।

**रिपञ्ची** – एकेन पदार्थेन अपरः पदार्थः सृज्यते अथवा विनष्टं वस्तु मृत्तिकायां मिलति । परं प्लास्टिके इयं प्रक्रिया असम्भवा एव ।

**परमिन्दर्** – कल्पयतु, यदि शतं वर्षाणि यावत् प्लास्टिक–निर्मितानां पदार्थानां निर्माणप्रक्रिया पृथिव्यां प्रचलिष्यति तर्हि किं स्यात् ?!

**(अ) एकपदेन उत्तरत–** **2 x 1=2**

1) कस्य मृत्तिकायां लयाभावात् अस्माकं पर्यावरणस्य कृते महती क्षतिः भवति ?

-------------------------------

2) विनष्टं वस्तु कस्यां मिलति? ----------------------------

**(आ) एकवाक्येन उत्तरत–** **१ x 1=१**

1) परमिन्दर् किं कथयति?

---

१. भवति ---------भवतः भवन्ति । (१)

२. सप्तमी विभक्ति पदं लिखत - -----(१)

**13. श्लोकांशान् मेलयत–** **4 x 1=4**

1. किं कुर्यात् कातरो युद्धे अत्रैवोक्तं न बुद्ध्यते
2. विद्वद्भिः का सदा वन्द्या तक्रं शक्रस्य दुर्लभम्
3. कं सञ्जघान कृष्णः मृगात् सिंहः पलायते
4. कथं विष्णुपदं प्रोक्तम् काशीतलवाहिनी गङ्गा

1--------------------------------------------

2--------------------------------------------

3------------------------------------------------

4------------------------------------------------

**१४. रेखाङ्कितपदानि आश्रित्य प्रश्ननिर्माणं कुरुत–** **१/२ x ४=२**

1) **तडागाः** संसारसागराः कथ्यन्ते।
---------------------------------------------?

2) पृथिव्याः मानदण्डः **हिमालयः** अस्ति।

---------------------------------------------?

3) कुमारसम्भवमहाकाव्यं **कालिदासेन** विरचितम्।

---------------------------------------------?

**4)** कार्यसमाप्तौ **वेतनानि** अतिरिच्य सम्मानमपि गजधराः प्राप्नुवन्ति ।

-------------------------------------------------?

१५. आम् अथवा न लिखत २

१. कातरो युद्धे युध्यते ---------

२. कस्तूरि मृगात् जायते -----------

३. कंसः जघान कृष्णम् -------------

४. तक्रं शक्रस्य दुर्लभम् ------------

१६. भिन्न प्रकृतिपदचयनं कुरुत - २

१. गच्छति, पठति ,धावति , अहसत् ----------

२. छात्रः, सेवकः , शिक्षकः, लेखिका ---------

३. पत्रं ,मित्रम् , पुष्पम् , आम्रः ---------------

४. व्याघ्रः, भल्लूकः, गजह्, कपोतः -------------

१७ . अनुच्छेदं पूरयत (२)

एकः काकः -----------डयमानःआसीत् । तृषार्तः सह -----अन्वेषनं करोति ।

तदा सः ----------अल्पं ---------- पश्यति ।

( जलं, घटे, आकाशे ,जलस्य )

१८.. विलोमानि पूरयत २

1. उपरि ----------
2. आदानं -----------
3. परकीयं ------------
4. विषमता -----------